**तूर्ण** न० त्वर–संभ्रमे भावे क्त पक्षे इड़भावः ऊठ् तस्य नः। १शीघ्रे कर्त्तरि क्त। २त्वरायुक्ते त्रि०अमरः। "अभ्यागतोऽभ्यागततूर्णतर्णकान्" माघः। "चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने!"। पर्णानि स्वर्णवर्णानि सीदन्त्याकर्णलोचने!" उद्भटः।

**तूर्णाश** न० तूर्णमश्नुते अश–अच्। १उदके। "प्रतिश्रुताया वो धृषत्तूर्णाशं न गिरेरधि" ऋ० ८।३२।२। "तूर्णाशमुदकं भवति तूर्णमश्नुते" निरु० भा०।

**तूर्णि** पु०त्वर–नि नि० ऊठ्। १मनसि उज्ज्वलदत्तः शब्दकल्पद्रुमे मलार्थतोक्तिः नकारस्थाने लकारभ्रमात्। भावेनि। २त्वरायां हेमच०। ३स्तोके संक्षिप्तसारे उणा० ४क्षिप्रे निघण्टुः। ५तद्वति त्रि०। "प्र यतत्स्तोता जरिता तूर्ण्यर्थः" ऋ० ३।५।२।५। "तूर्ण्यर्थः त्वरितगमनाः" भा० "विगाहं तूर्णिं तविषीभिरावृतम्"ऋ० ३।३।५। "तूर्णिं क्षिप्रगामिनम्" भा०।

**तूर्त** न० त्वर–क्त ऊठ् वेदे न तस्य नः। १क्षिप्रे "यद्वै क्षिप्रं तत्तूर्त्तमथ यत् क्षिप्रात् क्षेपीयस्तत्प्रतूर्त्तम्" शत० ब्रा० ६।३।२।२।

**तूर्य्य** न० तुर्य्यते ताड्यते तूर–यत्। वाद्यभेदे "होमावसाने कृततूर्य्यनादः" मत्पु० तुलापुरुषदानविधौ "तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः" मनुः। एतत्परस्य मानस्य गिरिनद्या० न णत्वम् तूर्य्यमानम् "सतूर्य्यमेनां स्नपयाम्बभूवुः" कुमा०।

**तूर्य्यखण्ड** पु० ६त०। वाद्यभेदे डगड़वाद्ये हारा०।

**तूर्व** न०तुर्व अच्–रेफे पूर्वाणो दीर्घः। १क्षिप्रे तूर्णे "तूर्वयाणो गूर्त्तवचस्तमः" ऋ० १०।६१।२। "तूर्य्ययाणस्तूर्णगमनः" भा०। "रक्षो अग्निमशुषं तूर्वयाणम्" ऋ० १।१७४।२। [ऋ० ८।४२।३।

**तूर्वि** न० तुर्व–इन् दीर्घः। १क्षिप्रे "वाष्टधानाय तूर्वये"

**तूल** पूरणे चुरा० आ० सक० सेट्। तूलयते अतूतुलत।

**तूल** इयत्तापरिच्छेदे निष्काशने भ्वा० पर० सक० सेट्। तूलति अतूलीत्। तुतूल।

**तूल** न० तूलयति पूरयति तूल्यते वा तूल–अच्। १सर्वव्यापके आकाशे मेदि० २ब्रह्मस्थाकारे तूदे वृक्षे भावप्र० तूदशब्दे दृश्यम्। कार्पासादिबीजजाते(तूला)। ख्याते पदार्थे। "सर्वं दहति गङ्गाम्भस्तूलराशिमिवानलः"प्रा० त०। अव्ययीभावेऽस्य "कूलतीरतूलेत्यादिना" पा०आद्युदात्तता उपतूलम्। तूलशब्दे परे ईषिकाशब्दस्य षष्ठीतत्पुरुषे ह्रस्वः। ईषिकतूलं मुञ्जेषीकातूलम्। "कञ्चुकं तूलगर्भञ्च तूलिकाम् स्रपवीतिकां मञ्जिष्ठाद्युपवासांसि तथा तूलवतीं पटीम्। ऊर्णामयानि वासांसि यतिभ्योऽपि प्रदापयेत्" काशी० ४ अ०।

**तूलक** न० तूल–स्वार्थे क। तूले हेमच०।

**तूलकार्मुक** न० तूलस्य स्फोटनार्थं कार्मुकम्। तूलस्फोटनार्थे धनुषि (धुनखरा) तूलचापादयोऽप्यत्र शब्दच०।

**तूलनालि(ली** स्त्री० तूलनिर्म्मिता नाली। पिञ्जिकायाम् (पाइज) स्वार्थे क। अत्रैवार्थे स्त्री त्रिका०।

**तूलपिचु** पु० पिच–मर्दने कुन् तूलप्रधानः पिचुः। तूलवृक्षे (तुलारगाछ) भरतः। [राजनि०।

**तूलवृक्ष** पु० तूलसाधनं वृक्षः शाक०त०। शाल्मलिवृक्षे।

**तूलशर्करा** स्त्री तूलस्य शर्करेव। कार्पासबीजे रत्ना०।

**तूलसेवन** न० ६त०। तूलसूत्रकर्त्तने (काटनाकाटा) शब्दमा० तूलसेचनेति चमध्यपाठः प्रमादिकः।

**तूलि(ली)** स्त्री तूल–इन् वा ङीप्। चित्रसाधने स्वनामख्याते पदार्थे सि० कौ०।

**तूलिका** स्त्री तूली स्वार्थे क। १नील्यां २वर्त्तौ च शब्दर०। तूलीशब्दार्थे ३लेख्यकूर्चिकायां ४वीरणादिशलाकायाम्। ५आवर्त्तितसुवर्णादेर्द्रवाधारपात्रभेदे(मुचि)। तूल अस्त्यस्य ठन् कापि अत इत्त्वम्। ६(तोषक्) शय्याभेदे तूलशब्दे उदा०। "उन्मीलितं तूलिकयेव चित्रम्"कुमा०। "तूलिका कथिता लेख्यकूर्चिका तूलशय्ययोः" विश्वः। तूलपूरितशय्या च तूलशय्येत्यर्थः।

**तूलिनी** स्त्री तूलोऽस्त्यस्याः इनि ङीप्। शाल्मलीवृक्षे भावप्र०। २लक्ष्मणाकन्दे राजनि०। ३तूलयुक्ते त्रि० स्त्रियां ङीप् तूलिफला। [रत्नमा०।

**तूलिफला** स्त्री तूलि तूलवत् फलं यस्याः। १शाल्मलीवृक्षे

**तूवर** पु० सौ०तु–बा० वरच् दीर्घश्च। १तूपरशब्दार्थे २कषाये रसे अमरः। ३तद्वति त्रि० अमरः।

**तूवरिका** स्त्री सौ० तु–बा० वरच् दीर्घः संज्ञायां कन् कापि अत इत्त्वम्। १आढक्याम् (अड़रहर) २सौराष्ट्रमृत्तिकायाञ्च भरतः।

**तूवरी** स्त्री तूवर+गौरा०ङीष्। १आढक्याम् २सौराष्ट्रमृत्ति- [ कायाञ्च (फिट्किरि) भरतः।

**तूष** तुष्टौ भ्वा० पर०सक०सेट्। तूषति अतूषीत्। तुतूष।

**तूष्णींशील:** त्रि० तूष्णीं शीलं यस्य। १मौनावलम्बिनि।

**तूष्णीक** त्रि० तूष्णीं शीलं यस्य शीलेऽर्थे कन् मलोपश्च। मौनावलम्बिनि अमरः।